कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ षष्ठ काण्डे प्रथमः प्रश्नः॥

हरिः ओम्॥ प्राचीनवग्ंशङ्करोति देवमनुष्या दिशो व्यभजन्त प्राचीन्देवा दक्षिणा पितरः प्रतीचीं मनुष्या उदीचीग्ं रुद्रा यत्प्राचीनवग्ंशङ्करोति देवलोकमेव तद्यजमान उपावर्तते परि श्रयत्यन्तर्हितो हि देवलोको मनुष्यलोकाऽन्नास्माल्लोकाथ्स्वेतव्यमिवेत्याहुः को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वेति दिक्ष्वतीकाशान्करो- [१] त्युभयोर्लोकयोरभिजित्यै केशश्मश्रु वपते नखानि नि कृन्तते मृता वा एषा त्वगमेध्या यत्केशश्मश्रु मृतामेव त्वचममेध्यामपहत्य यज्ञियो भूत्वा मेधमुपैत्यङ्गिरसः सुवर्गं लोकं यन्तोऽप्सु दीक्षातपसी प्रावेशयन्नप्सु स्नाति साक्षादेव दीक्षातपसी अव रुन्धे तीर्थे स्नाति तीर्थे हि ते तां प्राऽवेशयन्तीर्थे स्नाति [२] तीर्थमेव समानानां भवत्यपो ऽश्नात्यन्तरत एव मेध्यो भवति वाससा दीक्षयति सौम्यं वै क्षौमन्देवतया सोममेष देवतामुपैति यो दीक्षते सोमस्य तनूरसि तनुवं मे पाहीत्याह स्वामेव देवतामुपैत्यथो आशिषमेवैतामा शास्तेऽग्नेस्तूषाधानं वायोर्वातपानं पितृणां नीविरोषधीनां प्रघातः [३] आदित्यानां प्राचीनतानो विश्वेषां देवानामोतुर्नक्षत्राणामतीकाशास्तद्वा एतथ्सर्वदेवत्यं यद्वासो यद्वाससा दीक्षयति सर्वाभिरेवैनं देवताभिर्दीक्षयति बहिःप्राणो वै मनुष्यस्तस्याऽशनं प्राणोऽश्नाति सप्राण एव दीक्षत आशितो भवति यावानेवाऽस्य प्राणस्तेन सह मेधमुपैति घृतं देवानां मस्तु पितृणां निष्पक्वं मनुष्याणां तद्वा [४] एतथ्सर्वदेवत्यं यन्नवनीतं

यन्नवनीतेनाऽभ्यङ्क्ते सर्वा एव देवताः प्रीणाति प्रच्युतो वा एषोऽस्माल्लोकादगतो देवलोकं यो दीक्षितोऽन्तरेव नवनीतन्तस्मान्नवनीतेनाऽभ्यङ्क्तेऽनुलोमं यजुषा व्यावृत्त्या इन्द्रो वृत्रमहन्तस्य कनीनिका पराऽपतत्तदाञ्जनमभवद्यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते दक्षिणं पूर्वमाऽङ्क्ते [५] सव्यग्ं हि पूर्वं मनुष्या आञ्जते न नि धावते नीव हि मनुष्या धावन्ते पञ्च कृत्व आऽङ्क्ते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्धे परिमितमाऽङ्क्तेऽपरिमितग्ं हि मनुष्या आञ्जते सतूलयाऽऽङ्क्तेऽपतूलया हि मनुष्या आञ्जते व्यावृत्त्यै यदपतूलयाऽऽञ्जीत वज्र इव स्याथ्सतूलयाऽऽङ्क्ते मित्रत्वाये– [६] न्द्रो वृत्रमहन्थ्सोऽ १ पोऽ १ भ्यम्रियत तासां यन्मेध्यं यज्ञियग्ं सदेवमासीत्तदपोदक्रामत्ते दर्भा अभवन् यद्दर्भ पुञ्जीलैः पवयति या एव मेध्या यज्ञियाः सदेवा आपस्ताभिरेवैनं पवयति द्वाभ्यां पवयत्यहोरात्राभ्यामेवैनं पवयति त्रिभिः पवयति त्रय इमे लोका एभिरेवैनं लोकैः पवयति पञ्चभिः [७] पवयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञायैवैनं पवयति षड्भिः पवयति षड्वा ऋतव ऋतुभिरेवैनं पवयति सप्तभिः पवयति सप्त छन्दाग्ंसि छन्दोभिरेवैनं पवयति नवभिः पवयति नव वै पुरुषे प्राणाः सप्राणमेवैनं पवयत्येकविग्ंशत्या पवयति दश हस्त्या अङ्गुलयो दश पद्या आत्मैकविग्ंशो यावानेव पुरुषस्तमपरिवर्गं [८] पवयति चित्पतिस्त्वा पुनात्वित्याह मनो वै चित्पतिर्मनसैवैनं पवयति वाक्पतिस्त्वा पुनात्वित्याह वाचैवैनं पवयति देवस्त्वा सविता पुनात्वित्याह सवितृप्रसूत एवैनं पवयति तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयमित्याहाऽऽशिषमेवैतामा शास्ते॥[९]

अतीकाशान्करोत्यर्वेशयन्तीत्थे स्नाति प्रघातो मनुष्याणान्तद्वा आऽङ्क्ते मित्रत्वाय

पञ्चभिरपरिवर्गमष्टाचत्वारिꣳशच्च॥6.1.1॥

यावन्तो वै देवा यज्ञायाऽपुनत त एवाऽभवन् य एवं विद्वान् यज्ञाय पुनीते भवत्येव बहिः पवयित्वाऽन्तः प्र पादयति मनुष्यलोक एवैनं पवयित्वा पूतं देवलोकं प्र णयत्यदीक्षित एकयाऽऽहुत्येत्याहुः स्रुवेण चतस्रो जुहोति दीक्षितत्वाय स्रुचा पञ्चमीं पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्ध आकूत्यै प्रयुजेऽग्नये [१०] स्वाहेत्याहाऽऽकूत्या हि पुरुषो यज्ञमभि प्रयुङ्क्ते यजेयेति मेधायै मनसेऽग्नये स्वाहेत्याह मेधया हि मनसा पुरुषो यज्ञमभिगच्छति सरस्वत्यै पूष्णेऽग्नये स्वाहेत्याह वाग्वै सरस्वती पृथिवी पूषा वाचैव पृथिव्या यज्ञं प्र युङ्क्त आपो देवीर्बृहतीर्विश्वशम्भुव इत्याह या वै वर्ष्यास्ता [११] आपो देवीर्बृहतीर्विश्वशम्भुवो यदेतद्यजुर्न ब्रूयाद्दिव्या आपोऽशान्ता इमं लोकमा गच्छेयुरापो देवीर्बृहतीर्विश्वशम्भुव इत्याहाऽस्मा एवैना लोकाय शमयति तस्माच्छान्ता इमं लोकमा गच्छन्ति द्यावापृथिवी इत्याह द्यावापृथिव्योर्हि यज्ञ उर्वन्तरिक्षमित्याहाऽन्तरिक्षे हि यज्ञो बृहस्पतिर्नो हविषा वृधा- [१२] त्वित्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवाऽस्मै यज्ञमव रुन्धे यद्ब्रूयाद्विधेरिति यज्ञस्थाणुमृच्छेद्वृधात्वित्याह यज्ञस्थाणुमेव परि वृणक्ति प्रजापतिर्यज्ञमसृजत सोऽस्माथ्सृष्टः पराडैथ्स प्र यजुरव्लीनात्प्र साम तमृगुदयच्छद्यदृगुदयच्छत्तदौद्ग्रहणस्यौद्ग्रहणत्वमृचा [१३] जुहोति यज्ञस्योद्यत्या अनुष्टुप्छन्दसामुदयच्छदित्याहुस्तस्मादनुष्टुभा जुहोति यज्ञस्योद्यत्यै द्वादश वाथ्सबन्धान्युदयच्छन्नित्याहुस्तस्माद्द्वादशभिर्वाथ्सबन्धविदो दीक्षयन्ति सा वा एषर्गनुष्टुग्वाग्नुष्टुग्यदेतयर्चा दीक्षयति वाचैवैनग्ं सर्वया दीक्षयति विश्वे देवस्य

नेतुरित्याह सावित्र्येतेन मर्तो वृणीत सख्य- [१४] मित्याह पितृदेवत्यैतेन विश्वे राय इषुध्यसीत्याह वैश्वदेव्येतेन द्युम्नं वृणीत पुष्यस इत्याह पौष्णयेतेन सा वा एषक्सर्वदेवत्या यदेतयर्चा दीक्षयति सर्वाभिरेवैनं देवताभिर्दीक्षयति सप्ताक्षरं प्रथमं पदमष्टाक्षराणि त्रीणि यानि त्रीणि तान्यष्टावुपयन्ति यानि चत्वारि तान्यष्टौ यदष्टाक्षरा तेन [१५] गायत्री यदेकादशाक्षरा तेन त्रिष्टुग्यद्द्वादशाक्षरा तेन जगती सा वा एषक्सर्वाणि छन्दाग्ंसि यदेतयर्चा दीक्षयति सर्वेभिरेवैनं छन्दोभिर्दीक्षयति सप्ताक्षरं प्रथमं पदग्ं सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाऽव रुन्ध एकस्मादक्षरादनाप्तं प्रथमं पदं तस्माद्यद्वाचोऽनाप्तं तन्मनुष्या उप जीवन्ति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाग्ंसृष्ट्यै॥[१६]

अग्नये ता वृधात्वृचा सख्यन्तेन जुहोति पञ्चदश च||6.1.2||

ऋक्सामे वै देवेभ्यो यज्ञायाऽतिष्ठमाने कृष्णो रूपं कृत्वाऽपक्रम्याऽतिष्ठतान्तेऽमन्यन्त यं वा इमे उपावर्त्स्यतः स इदं भविष्यतीति ते उपाऽमन्त्रयन्त ते अहोरात्रयोर्महिमानमपनिधाय देवानुपावर्तेतामेष वा ऋचो वर्णो यच्छुक्लं कृष्णाजिनस्यैष साम्नो यत्कृष्णमृक्सामयोः शिल्पे स्थ इत्याहक्सामे एवाऽव रुन्ध एष [१७] वा अह्नो वर्णो यच्छुक्लं कृष्णाजिनस्यैष रात्रिया यत्कृष्णं यदेवैनयोस्तत्र न्यक्तं तदेवाव रुन्धे कृष्णाजिनेन दीक्षयति ब्रह्मणो वा एतद्रूपं यत्कृष्णाजिनं ब्रह्मणैवैनं दीक्षयतीमां धियग्ं शिक्षमाणस्य देवेत्याह यथायजुरेवैतद्गर्भो वा एष यद्दीक्षित उल्बं वासः प्रोर्णुते तस्माद्- [१८] गर्भाः प्रावृता जायन्ते न पुरा सोमस्य

क्रयादपोर्ण्वीत यत्पुरा सोमस्य क्रयादपोर्ण्वीत गर्भाः प्रजानां परापातुकाः स्युः क्रीते सोमेऽपोर्णुते जायत एव तदथो यथा वसीयाग्ंसं प्रत्यपोर्णुते तादृगेव तदङ्गिरसः सुवर्गं लोकं यन्त ऊर्जं व्यभजन्त ततो यदत्यशिष्यत ते शरा अभवन्नूर्वै शरा यच्छरमयी [१९] मेखला भवत्यूर्जमेवाऽव रुन्धे मध्यतः सं नह्यति मध्यत एवाऽस्मा ऊर्जं दधाति तस्मान्मध्यत ऊर्जा भुञ्जत ऊर्ध्वं वै पुरुषस्य नाभ्यै मेध्यमवाचीनममेध्यं यन्मध्यतः संनह्यति मेध्यं चैवाऽस्याऽमेध्यं च व्यावर्तयतीन्द्रो वृत्राय वज्रं प्राऽहरथ्स त्रेधा व्यभवथ्स्फ्यस्तृतीयग्ं रथस्तृतीयं यूपस्तृतीयं [२०] येऽन्तःशरा अशीर्यन्त ते शरा अभवन्तच्छराणाग्ं शरत्वं वज्रो वै शराः क्षुत्खलु वै मनुष्यस्य भ्रातृव्यो यच्छरमयी मेखला भवति वज्रेणैव साक्षात्क्षुधं भ्रातृव्यं मध्यतोऽप हते त्रिवृद्भवति त्रिवृद्वै प्राणस्त्रिवृतमेव प्राणं मध्यतो यजमाने दधाति पृथ्वी भवति रज्जूनां व्यावृत्त्यै मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीं मिथुनत्वाय [२१] यज्ञो दक्षिणामभ्यध्यायत्ताग्ं समभवत्तदिन्द्रोऽचायथ्सोऽमन्यत यो वा इतो जनिष्यते स इदं भविष्यतीति तां प्राविशत्तस्या इन्द्र एवाऽजायत सोऽमन्यत यो वै मदितोऽपरो जनिष्यते स इदं भविष्यतीति तस्या अनुमृश्य योनिमाऽच्छिनथ्सा सूतवशाऽभवत्तथ्सूतवशायै जन्म [२२] ताग्ं हस्ते न्यवेष्टयत तां मृगेषु न्यदधाथ्सा कृष्णविषाणाऽभवदिन्द्रस्य योनिरसि मा मा हिग्ंसीरिति कृष्णविषाणां प्र यच्छति सयोनिमेव यज्ञं करोति सयोनिं दक्षिणाग्ं सयोनिमिन्द्रग्ं सयोनित्वाय कृष्यै त्वा सुसस्याया इत्याह तस्मादकृष्टपच्या ओषधयः पच्यन्ते सुपिप्पलाभ्यस्त्वौषधीभ्य इत्याह तस्मादोषधयः फलं गृह्णन्ति यद्धस्तेन [२३] कण्डूयेत पामनम्भावुकाः प्रजाः स्युर्यथ्स्मयेत नग्नम्भावुकाः कृष्णविषाणया कण्डूयतेऽपिगृह्य स्मयते प्रजानां

गोपीथाय न पुरा दक्षिणाभ्यो नेतोः कृष्णविषाणामव चृतेद्यत्पुरा दक्षिणाभ्यो नेतोः कृष्णविषाणामवचृतेद्योनिः प्रजानां परापातुका स्यान्नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति योनिर्वै यज्ञस्य चात्वालं योनिः कृष्णविषाणा योनावेव योनिं दधाति यज्ञस्य सयोनित्वाय॥[२४]

रुन्ध एष तस्माच्छरमयी यूपस्तृतीयं मिथुनत्वाय जन्म हस्तेनाऽष्टाचत्वारिग्ं शच्च॥6.1.3॥

वाग्वै देवेभ्योऽपाऽक्रामद्यज्ञायाऽतिष्ठमाना सा वनस्पतीन्प्राऽविशथ्सैषा वाग्वनस्पतिषु वदति या दुन्दुभौ या तूणवे या वीणायां यद्दीक्षितदण्डं प्रयच्छति वाचमेवाऽव रुन्ध औदुम्बरो भवत्यूर्ग्वा उदुम्बर ऊर्जमेवाऽव रुन्धे मुखेन संमितो भवति मुखत एवाऽस्मा ऊर्जं दधाति तस्मान्मुखत ऊर्जा भुञ्जते [२५] क्रीते सोमे मैत्रावरुणाय दण्डं प्र यच्छति मैत्रावरुणो हि पुरस्तादृत्विग्भ्यो वाचं विभजति तामृत्विजो यजमाने प्रति ष्ठापयन्ति स्वाहा यज्ञं मनसेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति स्वाहा द्यावापृथिवीभ्यामित्याह द्यावापृथिव्योर्हि यज्ञः स्वाहोरोरन्तरिक्षादित्याहाऽन्तरिक्षे हि यज्ञः स्वाहा यज्ञं वातादारभ इत्याहाऽयं [२६] वाव यः पवते स यज्ञस्तमेव साक्षादा रभते मुष्टी करोति वाचं यच्छति यज्ञस्य धृत्या अदीक्षिष्टाऽयं ब्राह्मण इति त्रिरुपाग्श्चाह देवेभ्य एवैनं प्राऽह त्रिरुच्चैरुभयेभ्य एवैनं देवमनुष्येभ्यः प्राऽह न पुरा नक्षत्रेभ्यो वाचं वि सृजेद्यत्पुरा नक्षत्रेभ्यो वाचं विसृजेद्यज्ञं विच्छिन्द्या- [२७] दुदितेषु नक्षत्रेषु व्रतं कृणुतेति वाचं वि सृजति यज्ञव्रतो वै दीक्षितो यज्ञमेवाऽभि वाचं वि सृजति यदि विसृजेद्वैष्णवीमृचमनु ब्रूयाद्यज्ञो वै विष्णुर्यज्ञेनैव यज्ञग्ं सं तनोति दैवीं धियं मनामह इत्याह यज्ञमेव

तन्म्रदयति सुपारा नो असद्वश इत्याह व्युष्टिमेवाऽव रुन्धे [२८] ब्रह्मवादिनो वदन्ति होतव्यं दीक्षितस्य गृहा ३ इ न होतव्या ३ मिति हविर्वै दीक्षितो यज्जुहुयाद्यजमानस्याऽवदाय जुहुयाद्यन्न जुहुयाद्यज्ञपरुरन्तरियाद्ये देवा मनोजाता मनोयुज इत्याह प्राणा वै देवा मनोजाता मनोयुजस्तेष्वेव परोऽक्षं जुहोति तन्नेव हुतन्नेवाऽहुतग्ग् स्वपन्तं वै दीक्षितग्ं रक्षाग्ंसि जिघाग्ंसन्त्यग्निः [२९] खलु वै रक्षोहाऽग्ने त्वग्ं सु जागृहि वयग्ं सु मन्दिषीमहीत्याहाऽग्निमेऽवाधिपां कृत्वा स्वपिति रक्षसामपहत्या अव्रत्यमिव वा एष करोति यो दीक्षितः स्वपिति त्वमग्ने व्रतपा असीत्याहाऽग्निर्वै देवानां व्रतपतिः स एवैनं व्रतमा लम्भयति देव आ मर्त्येष्वेत्याह देवो [३०] ह्येष सन्मर्त्येषु त्वं यज्ञेष्वीड्य इत्याहैतग्ं हि यज्ञेष्वीडतेऽप वै दीक्षिताथ्सुषुपुष इन्द्रियं देवताः क्रामन्ति विश्वे देवा अभि मामाऽववृत्रन्नित्याहेन्द्रियेणैवैनं देवताभिः सं नयति यदेतद्यजुर्न ब्रूयाद्यावत एव पशूनभि दीक्षेत तावन्तोऽस्य पशवः स्यू रास्वेय- [३१] थ्सोमाऽऽ भूयो भरेत्याहाऽपरिमितानेव पशूनव रुन्धे चन्द्रमसि मम भोगाय भवेत्याह यथादेवतमेवैनाः प्रति गृह्णाति वायवे त्वा वरुणाय त्वेति यदेवमेता नाऽनुदिशेदयथादेवतं दक्षिणा गमयेदा देवताभ्यो वृश्च्येत यदेवमेता अनुदिशति यथादेवतमेव दक्षिणा गमयति न देवताभ्य आ [३२] वृश्च्यते देवीरापो अपां नपादित्याह यद्वो मेध्यं यज्ञियग्ं सदेवं तद्वो माऽव क्रमिषमिति वावैतदाहाऽच्छिन्नं तन्तुं पृथिव्या अनु गेषमित्याह सेतुमेव कृत्वाऽत्येति॥[३३]

भुञ्जतेऽयञ्छिन्द्याद्रुन्धेऽगिराह देव इयद्देवताभ्य आ त्रयस्त्रिग्ंशच्च॥6.1.4॥

देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्तेऽ१ न्योऽन्यमुपाऽधावन्त्वया प्र जानाम त्वयेति तेऽदित्याग्ं समधियन्त त्वया प्र जानामेति साऽब्रवीद्वरं वृणै मत्प्रायणा एव वो यज्ञा मदुदयना असन्निति तस्मादादित्यः प्रायणीयो यज्ञानामादित्य उदयनीयः पञ्च देवता यजति पञ्च दिशो दिशां प्रज्ञात्या [३४] अथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्धे पथ्याग् स्वस्तिमयजन्प्राचीमेव तया दिशं प्राऽजानन्नग्निना दक्षिणा सोमेन प्रतीचीग्ं सवित्रोदीचीमदित्योर्ध्वां पथ्याग् स्वस्तिं यजति प्राचीमेव तया दिशं प्रजानाति पथ्याग् स्वस्तिमिष्ट्वाऽग्नीषोमौ यजति चक्षुषी वा एते यज्ञस्य यदग्नीषोमौ ताभ्यामेवाऽनु पश्य– [३५] त्यग्नीषोमाविष्ट्वा सवितारं यजति सवितृप्रसूत एवाऽनु पश्यति सवितारमिष्ट्वाऽदितिं यजतीयं वा अदितिरस्यामेव प्रतिष्ठायाऽनु पश्यत्यदितिमिष्ट्वा मारुतीमृचमन्वाह मरुतो वै दैवानां विशो देवविशं खलु वै कल्पमानं मनुष्यविशमनु कल्पते यन्मारुतीमृचमन्वाह विशां क्लुप्त्यै ब्रह्मवादिनो वदन्ति प्रयाजवदननूयाजं प्रायणीयं कार्यमनूयाजव– [३६] दप्रयाजमुदयनीयमितीमे वै प्रयाजा अमी अनूयाजाः सैव सा यज्ञस्य सन्ततिस्तत्तथा न कार्यमात्मा वै प्रयाजाः प्रजाऽनूयाजा यत्प्रयाजा नन्तरियादात्मानमन्तरियाद्यद नूयाजानन्तरियात्प्रजामन्तरियाद्यतः खलु वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञः परा भवति यज्ञं पराभवन्तं यजमानोऽनु [३७] परा भवति प्रयाजवदेवाऽनूयाजवत्प्रायणीयं कार्यं प्रयाजवदनूयाजवदुदयनीयन्नाऽऽत्मानमन्तरेति न प्रजां न यज्ञः पराभवति न यजमानः प्रायणीयस्य निष्कास उदयनीयमभि निर्वपति सैव सा यज्ञस्य सन्ततिर्याः प्रायणीयस्य याज्या यत्ता उदयनीयस्य याज्याः कुर्यात्पराङ्मुं लोकमा रोहेत्प्रमायुकः

स्याद्याः प्रायणीयस्य पुरोऽनुवाक्यास्ता उदयनीयस्य याज्याः करोत्यस्मिन्नेव लोके प्रति तिष्ठति॥[३८]

प्रज्ञात्यै पश्यत्यनूयाजवद्यजमानोऽनु पुरोनुवाक्यास्ता अष्टौ च॥6.1.5॥

कद्रूश्च वै सुपर्णी चाऽऽत्मरूपयोरस्पर्धेताग्ं सा कद्रूः सुपर्णीमजयथ्साऽब्रवीत्तृतीयस्यामितो दिवि सोमस्तमा हर तेनाऽऽत्मानं निष्क्रीणीष्वेतीयं वै कद्रूरसौ सुपर्णी छन्दाग्ंसि सौपर्ण्याः साऽब्रवीदस्मै वै पितरौ पुत्रान्बिभृतस्तृतीयस्यामितो दिवि सोमस्तमा हर तेनाऽऽत्मानं निष्क्रीणीष्वे- [३९] ति मा कद्रूरवोचदिति जगत्युदपतच्चतुर्दशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताग्ं सा पशुभिश्च दीक्षया चाऽऽगच्छत्तस्माज्जगती छन्दसां पशव्यतमा तस्मात्पशुमन्तं दीक्षोप नमति त्रिष्टुगुदपतत्त्रयोदशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताग्ं सा दक्षिणाभिश्च [४०] तपसा चाऽऽगच्छत्तस्मात्त्रिष्टुभो लोके माध्यन्दिने सवने दक्षिणा नीयन्त एतत्खलु वाव तप इत्याहुर्यः स्वं ददातीति गायत्र्युदपतच्चतुरक्षरा सत्यजया ज्योतिषा तमस्या अजाऽभ्यरुन्ध तदजाया अजत्वग्ं सा सोमञ्चाऽऽहरच्चत्वारि चाऽक्षराणि साऽष्टाक्षरा समपद्यत ब्रह्मवादिनो वदन्ति [४१] कस्माथ्सत्याद्गायत्री कनिष्ठा छन्दसाग्ं सती यज्ञमुखं परीयायेति यदेवाऽदः सोममाऽहरत्तस्माद्यज्ञमुखं पर्यैत्तस्मात्तेजस्विनीतमा पद्भ्यां द्वे सवने समगृह्णान्मुखेनैकं यन्मुखेन समगृह्णात्तदधयत्तस्माद्द्वे सवने शुक्रवती प्रातःसवनं च माध्यन्दिनं च तस्मात्तृतीयसवन ऋजीषमभि षुण्वन्ति धीतमिव हि मन्यन्त [४२] आशिरमव नयति सशुक्रत्वायाऽथो सं भरत्येवैनत्तग्ं सोममाह्रियमाणं गन्धर्वो

विश्वावसुः पर्यमुष्णात्स तिस्रो रात्रीः परिमुषितोऽवसत्तस्मात्तिस्रो रात्रीः क्रीतः सोमो वसति ते देवा अब्रुवन्स्त्रीकामा वै गन्धर्वाः स्त्रिया निष्क्रीणामेति ते वाचग्ग् स्त्रियमेकहायनीं कृत्वा तया निरक्रीणन्थ्सा रोहिद्रूपं कृत्वा गन्धर्वेभ्यो- [४३] ऽपक्रम्याऽतिष्ठत्तद्रोहितो जन्म ते देवा अब्रुवन्नप युष्मदक्रमीन्नाऽस्मानुपावर्तते वि ह्वयामहा इति ब्रह्म गन्धर्वा अवदन्नगायन्देवाः सा देवान्गायत उपावर्तत तस्माद्गायन्तग्ग् स्त्रियः कामयन्ते कामुका एनग्ग् स्त्रियो भवन्ति य एवं वेदाऽथो य एवं विद्वानपि जन्येषु भवति तेभ्य एव ददत्युत यद्बहुतया [४४] भवन्त्येकहायन्या क्रीणाति वाचैवैनग्ं सर्वया क्रीणाति तस्मादेकहायना मनुष्या वाचं वदन्त्यकूटयाऽकर्णयाऽकाणयाऽश्लोणयाऽसप्तशफया क्रीणाति सर्वयैवैनं क्रीणाति यच्छवेतया क्रीणीयाद्दुश्चर्मा यजमानः स्याद्यत्कृष्णयाऽनुस्तरणी स्यात्प्रमायुको यजमानः स्याद्यद्द्विरूपया वार्त्रघ्नी स्याथ्स वाऽन्यञ्जिनीयात्तं वाऽन्यो जिनीयादरुणया पिङ्गाक्ष्या क्रीणात्येतद्वै सोमस्य रूपग्ग् स्वयैवैनं देवतया क्रीणाति॥ [४५]

निष्क्रीणीष्व दक्षिणाभिश्च वदन्ति मन्यन्ते गन्धर्वेभ्यो बहुतयाः पिङ्गाक्ष्या दश च॥6.1.6॥

तद्धिरण्यमभवत्तस्माददद्भ्यो हिरण्यं पुनन्ति ब्रह्मवादिनो वदन्ति कस्माथ्सत्यादनस्थिकेन प्रजाः प्रवीयन्तेऽस्थन्वतीर्जायन्त इति यद्धिरण्यं घृतेऽवधाय जुहोति तस्मादनस्थिकेन प्रजाः प्र वीयन्तेऽस्थन्वतीर्जायन्त एतद्वा अग्नेः प्रियं धाम यद्धृतं तेजो हिरण्यमियं ते शुक्र तनूरिदं वर्च इत्याह सतेजसमेवैनग्ं सतनुं [४६] करोत्यथो सं भरत्येवैनं यदबद्धमवदध्याद्गर्भाः प्रजानां परापातुकाः स्युर्बद्धमव

दधाति गर्भाणां धृत्यै निष्टक्र्यम्बध्नाति प्रजानां प्रजननाय वाग्वा एषा यथ्सोमक्रयणी जूरसीत्याह यद्धि मनसा जवते तद्वाचा वदति धृता मनसेत्याह मनसा हि वाग्धृता जुष्टा विष्णव इत्याह [४७] यज्ञो वै विष्णुर्यज्ञायैवैनां जुष्टां करोति तस्यास्ते सत्यसवसः प्रसव इत्याह सवितृप्रसूतामेव वाचमव रुन्धे काण्डेकाण्डे वै क्रियमाणे यज्ञग्ं रक्षाग्ंसि जिघाग्ंसन्त्येष खलु वा अक्षोहतः पन्था योऽग्नेश्च सूर्यस्य च सूर्यस्य चक्षुराऽरुहमग्नेरक्ष्णः कनीनिकामित्याह य एवाऽरक्षोहतः पन्थास्तग्ं समारोहति [४८] वाग्वा एषा यथ्सोमक्रयणी चिदसि मनाऽसीत्याह शास्त्येवैनामेतत्तस्माच्छिष्टाः प्रजा जायन्ते चिदसीत्याह यद्धि मनसा चेतयते तद्वाचा वदति मनाऽसीत्याह यद्धि मनसाऽभिगच्छति तत्करोति धीरसीत्याह यद्धि मनसा ध्यायति तद्वाचा [४९] वदति दक्षिणाऽसीत्याह दक्षिणा ह्येषा यज्ञियाऽसीत्याह यज्ञियामेवैनां करोति क्षत्रियाऽसीत्याह क्षत्रिया ह्येषाऽदितिरस्युभयतः शीर्ष्णीत्याह यदेवाऽऽदित्यः प्रायणीयो यज्ञानामादित्य उदयनीयस्तस्मादेवमाह यदबद्धा स्यादयता स्याद्यत्पदिबद्धाऽनुस्तरणी स्यात्प्रमायुको यजमानः स्या- [५०] द्यत्कर्णगृहीता वार्त्रघ्नी स्याथ्स वाऽन्यञ्जिनीयात्तं वाऽन्यो जिनीयान्मित्रस्त्वा पदि बध्नात्वित्याह मित्रो वै शिवो देवानां तेनैवैनां पदि बध्नाति पूषाऽध्वनः पात्वित्याहेयं वै पूषेमामेवाऽस्या अधिपामकः समष्ट्या इन्द्रायाऽध्यक्षायेत्याहेन्द्रमेवाऽस्या अध्यक्षं करो- [५१] त्यनु त्वा माता मन्यतामनु पितेत्याहाऽनुमतयैवैनया क्रीणाति सा देवि देवमच्छेहीत्याह देवी ह्येषा देवः सोम इन्द्राय सोममित्याहेन्द्राय हि सोम आह्रियते यदेतद्यजुर्न ब्रूयात्पराच्येव सोमक्रयणीयादुद्रस्त्वाऽऽ वर्तयत्वित्याह रुद्रो वै क्रूरो [५२] देवानान्तमेवाऽस्यै परस्ताद्दधात्यावृत्त्यै क्रूरमिव वा एतत्करोति यदुद्रस्य कीर्तयति

मित्रस्य पथेत्याह शान्त्यै वाचा वा एष वि क्रीणीते यः सोमक्रयण्या स्वस्ति सोमसखा पुनरेहि सह रय्येत्याह वाचैव विक्रीय पुनरात्मन्वाचं धत्ते ऽनुपदासुकाऽस्य वाग्भवति य एवं वेद॥[५३]

*सतनुं विष्णव इत्याह समारोहति ध्यायति तद्वाचा यजमानस्स्यात्करोति क्रूतो वेद॥**6.1.7***॥

षट्पदान्यनु निष्क्रामति षडहँवाङ्नाऽति वदत्युत संवथ्सरस्यायऽने यावत्येव वाक्तामव रुन्धे सप्तमे पदे जुहोति सप्तपदा शाक्वरी पशवः शाक्वरी पशूनेवाऽव रुन्धे सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाग्स्युभयस्याऽवरुद्ध्यै वस्व्यसि रुद्राऽसीत्याह रूपमेवाऽस्या एतन्महिमानं [५४] व्याचष्टे बृहस्पतिस्त्वा सुम्ने रण्वत्वित्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवाऽस्मै पशूनव रुन्धे रुद्रो वसुभिरा चिकेत्वित्याहाऽऽवृत्त्यै पृथिव्यास्त्वा मूर्धन्ना जिघर्मि देवयजन इत्याह पृथिव्या ह्येष मूर्धा यद्देवयजनमिडायाः पद इत्याहेडायै ह्येतत्पदं यथ्सोमक्रयण्यै घृतवति स्वाहे- [५५] त्याह यदेवाऽस्यै पदाद्धृतमपीद्धत तस्मादेवमाह यदध्वर्युरनग्नावाहुतिं जुहुयादन्धोऽध्वर्युः स्याद्रक्षाग्ंसि यज्ञग्ं हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञग्ं रक्षाग्ंसि घ्नन्ति काण्डेकाण्डे वै क्रियमाणे यज्ञग्ं रक्षाग्ंसि जिघाग्ंसन्ति परिलिखितग्ं रक्षः परिलिखिता अरातय इत्याह रक्षसामपहत्या [५६] इदमहग्ं रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव द्वेष्टि यश्चैनं द्वेष्टि तयोरेवाऽनन्तरायं ग्रीवाः कृन्तति पशवो वै सोमक्रयण्यै पदं याव त्मूतग्ं सं वपति पशूनेवाऽव रुन्धेऽस्मे राय इति सं वपत्यात्मानमेवाध्वर्युः [५७] पशुभ्यो नाऽन्तरेति त्वे राय इति

यजमानाय प्र यच्छति यजमान एव रयिं दधाति तोते राय इति पत्निया अर्धो वा एष आत्मनो यत्पत्नी यथा गृहेषु नि धत्ते तादृगेव तत्त्वष्टीमती ते सपेयेत्याह त्वष्टा वै पशूनां मिथुनानाग्ं रूपकृद्रूपमेव पशुषु दधात्यस्मै वै लोकाय गार्हपत्य आधीयतेऽमुष्मा आहवनीयो यद्गार्हपत्य उपवपेदस्मिँल्लोके पशुमान्थ्स्याद्यदाहवनीयेऽमुष्मिँल्लोके पशुमान्थ्स्यादुभयोरुप वपत्युभयोरेवैनं लोकयोः पशुमन्तं करोति॥ [५८]

महिमानग्ं स्वाहाऽपहत्या अध्वर्युर्धीयते चतुर्विग्ंशतिश्च॥6.1.8॥

ब्रह्मवादिनो वदन्ति विचित्यः सोमा ३ न विचित्या ३ इति सोमो वा ओषधीनाग्ं राजा तस्मिन्यदापन्नं ग्रसितमेवास्य तद्यद्विचिनुयाद्यथाऽऽस्याद्ग्रसितं निष्खिदति तादृगेव तद्यन्न विचिनुयाद्यथाऽऽक्षन्नापन्नं विधावति तादृगेव तत्क्षोधुकोऽध्वर्युः स्यात्क्षोधुको यजमानः सोमविक्रयिन्थ्सोमग्ं शोधयेत्येव ब्रूयाद्यदीतरं [५९] यदीतरमुभयेनैव सोमविक्रयिणमर्पयति तस्माथ्सोमविक्रयी क्षोधुकोऽरुणो ह स्माऽऽहौपवेशिः सोमक्रयण एवाऽहन्तृतीयसवनमव रुन्ध इति पशूनां चर्मन्मिमीते पशूनेवाव रुन्धे पशवो हि तृतीयग्ं सवनं यं कामयेताऽपशुः स्यादित्यृक्षतस्तस्य मिमीतर्क्षं वा अपशव्यमपशुरेव भवति यङ्कामयेत पशुमान्थ्स्या- [६०] दिति लोमतस्तस्य मिमीतैतद्वै पशूनाग्ं रूपग्ं रूपेणैवाऽस्मै पशूनव रुन्धे पशुमानेव भवत्यपामन्ते क्रीणाति सरसमेवैनं क्रीणात्यमात्योऽसीत्याहामैवैनं कुरुते शुक्रस्ते ग्रह इत्याह शुक्रो ह्यस्य ग्रहोऽनसाऽच्छ याति महिमानमेवाऽस्याऽच्छ यात्यनसा- [६१] ऽच्छ याति तस्मादनोवाह्यग्ं समे जीवनं यत्र खलु वा एतग्ं शीर्ष्णा हरन्ति

तस्माच्छीर्षहार्यं गिरौ जीवनमभि त्यं देवग्ं सवितारमित्यतिच्छन्दसर्चा मिमीतेऽतिच्छन्दा वै सर्वाणि छन्दाग्ंसि सर्वेभिरेवैनं छन्दोभिर्मिमीते वर्ष्म वा एषा छन्दसां यदतिच्छन्दा यदतिच्छन्दसर्चा मिमीते वर्ष्मैवैनग्ं समानानां करोत्यकयैकयोथ्सर्गं [६२] मिमीतेऽयातयाम्नियायातयाम्नियैवैनं मिमीते तस्मान्नानावीर्या अङ्गुलयः सर्वास्वङ्गुष्ठमुप नि गृह्णाति तस्माथ्समावद्वीर्योऽन्याभिरङ्गुलिभिस्तस्माथ्सर्वा अनु सं चरति यथ्सह सर्वाभिर्मिमीत सग्ग्श्लिष्टा अङ्गुलयो जायेरन्नेकयैकयोथ्सर्गं मिमीते तस्माद्विभक्ता जायन्ते पञ्च कृत्वो यजुषा मिमीते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्धे पञ्च कृत्वस्तूष्णीं [६३] दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवाऽन्नाद्यमव रुन्धे यद्यजुषा मिमीते भूतमेवाऽव रुन्धे यत्तूष्णीं भविष्यद्यद्वै तावानेव सोमः स्याद्यावन्तं मिमीते यजमानस्यैव स्यान्नाऽपि सदस्यानां प्रजाभ्यस्त्वेत्युप समूहति सदस्यानेऽवान्वाभजति वाससोप नह्यति सर्वदेवत्यं वै [६४] वासः सर्वाभिरेवैनं देवताभिः समर्धयति पशवो वै सोमः प्राणाय त्वेत्युप नह्यति प्राणमेव पशुषु दधाति व्यानाय त्वेत्यनु शृन्थति व्यानमेव पशुषु दधाति तस्माथ्स्वपन्तं प्राणा न जहति॥ [६५]

इतरं पशुमान्थ्स्याद्यत्यनसोथ्सर्गन्तूष्णीग्ं सर्वदेवत्यं वै त्रयस्त्रिग्ंशच्च॥6.1.9॥

यत्कलया ते शफेन ते क्रीणानीति पणेताऽगोअर्घग्ं सोमं कुर्यादगोअर्घं यजमानमगोअर्घमध्वर्युं गोस्तु महिमानन्नाऽव तिरेद्वा ते क्रीणानीत्येव ब्रूयाद्गोअर्घमेव सोमं करोति गोअर्घं यजमानं गोअर्घमध्वर्युं न गोर्महिमानमव

तिरत्यजया क्रीणाति सतपसमेवैनं क्रीणाति हिरण्येन क्रीणाति सशुक्रमेवै- [६६] नं क्रीणाति धेन्वा क्रीणाति साशिरमेवैनं क्रीणात्यृषभेण क्रीणाति सेन्द्रमेवैनं क्रीणात्यनड्वुहा क्रीणाति वह्निर्वा अनड्वान्वह्निनैव वह्नि यज्ञस्य क्रीणाति मिथुनाभ्यां क्रीणाति मिथुनस्याऽवरुद्ध्यै वाससा क्रीणाति सर्वदेवत्यं वै वासः सर्वाभ्य एवैनं देवताभ्यः क्रीणाति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवाऽन्नाद्यमव रुन्धे [६७] तपसस्तनूरसि प्रजापतेर्वर्ण इत्याह पशुभ्य एव तदध्वर्युर्नि ह्नुत आत्मनोऽनावस्काय गच्छति श्रियं प्र पशूनाप्नोति य एवं वेद शुक्रं ते शुक्रेण क्रीणामीत्याह यथायजुरेवैतद्देवा वै येन हिरण्येन सोममक्रीणन्तदभीषहा पुनराऽददत को हि तेजसा वि क्रेष्यत इति येन हिरण्येन [६८] सोमं क्रीणीयात्तदभीषहा पुनरा ददीत तेज एवाऽऽत्मन्धत्तेऽस्मे ज्योतिः सोमविक्रयिणि तम इत्याह ज्योतिरेव यजमाने दधाति तमसा सोमविक्रयिणमर्पयति यदनुपग्रथ्य हन्याद्दन्दशूकास्तागं् समागं् सर्पाः स्युरिदमहगं् सर्पाणां दन्दशूकानां ग्रीवा उप ग्रथ्नामीत्याहाऽदन्दशूकास्तागं् समागं् सर्पा भवन्ति तमसा सोमविक्रयिणं विध्यति स्वान [६९] भ्राजेत्याहैते वा अमुष्मिँल्लोके सोममरक्षन्तेभ्योऽधि सोममाऽहरन् यदेतेभ्यः सोमक्रयणाऽन्नानुदिशेदक्रीतोऽस्य सोमः स्याऽन्नास्यैतेऽमुष्मिँल्लोके सोमगं् रक्षेयुर्यदेतेभ्यः सोमक्रयणाननुदिशति क्रीतोऽस्य सोमो भवत्येतेऽस्याऽमुष्मिँल्लोके सोमगं् रक्षन्ति॥[७०]

सशुक्रमेव रुन्ध इति येन हिरण्यएन स्वान चतुश्चत्वारिगं्शच्च॥6.1.10॥

वारुणो वै क्रीतः सोम उपनद्धो मित्रो न एहि सुमित्रधा इत्याह शान्त्या इन्द्रस्योरुमा

विश दक्षिणमित्याह देवा वै यग्ं सोममक्रीणन्तमिन्द्रस्योरौ दक्षिण आऽसादयन्नेष खलु वा एतर्हीन्द्रो यो यजते तस्मादेवमाहोदायुषा स्वायुषेत्याह देवता एवाऽन्वारभ्योत्- [७१] तिष्ठत्युर्वन्तरिक्षमन्विहीत्याहाऽन्तरिक्षदेवत्यो २ ह्येतर्हि सोमोऽदित्याः सदोऽस्यदित्याः सद आ सीदेत्याह यथायजुरेवैतद्वि वा एनमेतदर्धयति यद्वारुणग्ं सन्तं मैत्रं करोति वारुण्यर्चाऽऽ सादयति स्वयैवैनं देवतया समर्धयति वाससा पर्यानह्यति सर्वदेवत्यं वै वासः सर्वाभिरेवै- [७२] नं देवताभिः समर्धयत्यथो रक्षसामपहत्यै वनेषु व्यन्तरिक्षं तताने त्याह वनेषु हि व्यन्तरिक्षं तताने वाजमर्वथ्स्वित्याह वाजग्ग् ह्यर्वथ्सु पयो अघ्नियास्वित्याह पयो ह्यघ्नियासु हृथ्सु क्रतुमित्याह हृथ्सु हि क्रतुं वरुणो विक्ष्वग्निमित्याह वरुणो हि विक्ष्वग्निं दिवि सूर्य- [७३] मित्याह दिवि हि सूर्यग्ं सोममद्रावित्याह ग्रावाणो वा अद्रयस्तेषु वा एष सोमं दधाति यो यजते तस्मादेवमाहोदु त्यं जातवेदसमिति सौर्यर्चा कृष्णाजिनं प्रत्यानह्यति रक्षसामपहत्या उस्रावेतं धूर्षाहावित्याह यथायजुरेवैतत्प्र च्यवस्व भुवस्पत इत्याह भूतानाग् ह्ये- [७४] ष पतिर्विश्वान्यभि धामानीत्याह विश्वानि ह्ये २ षोऽभि धामानि प्रच्यवते मा त्वा परिपरी विददित्याह यदेवादः सोममाह्रियमाणङ्गन्धर्वो विश्वावसुः पर्यमुष्णात्तस्मादेवमाहाऽपरिमोषाय यजमानस्य स्वस्त्ययन्यसीत्याह यजमानस्यैवैष यज्ञस्याऽन्वारम्भोऽनवच्छित्त्यै वरुणो वा एष यजमानमभ्यैति यत् [७५] क्रीतः सोम उपनद्धो नमो मित्रस्य वरुणस्य चक्षस इत्याह शान्त्या आ सोमं वहन्त्यग्निना प्रति तिष्ठते तौ सम्भवन्तौ यजमानमभि सम्भवतः पुरा खलु वावैष मेधायाऽऽत्मानमारभ्य चरति यो दीक्षितो यदग्नीषोमीयं पशुमालभत आत्मनिष्क्रयण एवाऽस्य स तस्मात्तस्य नाऽऽश्यं पुरुषनिष्क्रयण इव

ह्यथो खल्वाहुरग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन्निति यदग्नीषोमीयं पशुमालभते वार्त्रघ्न एवास्य स तस्माद्वाश्यं वारुण्यर्चा परि चरति स्वयैवैनं देवतया परि चरति॥ [७६]

अन्वारभ्योत्सर्वाभिरेव सूर्यं भूतानाग्ं ह्येति यदाहुस्सप्तविग्ंशतिश्च॥6.1.11॥

प्राचीनवग्ंशंयावन्त ऋख्सामो वाग्वै देवेभ्यो देवा वै देवयजएनङ्कृदूश्च तद्विरण्यग्ं षट्पदानि ब्रह्मवादिनो विचित्ये यत्कलया ते वारुणो वै क्रीतस्सोम एकादश॥11॥

प्राचीनवघ्ंशंग्ग् स्वाहेत्याह योऽन्तश्शरा ह्येष सन्तपसा च यत्कर्णगृहीतेति लोमतो वारुणष्षट्थ्सप्तितिः॥७६॥

प्राचीनवग्ंशं परि चरति॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति षष्ठ काण्डे प्रथमः प्रश्नः॥